# 2021

## SANSKRIT — HONOURS

**Paper : CC-3**

**[Classical Sanskrit Literature (Prose)]**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

**Unit : I**

**(Marks : 10)**

1. "अपरिणामोपशमः दारुणो लक्ष्मीमदः" –यथापाठ्यम् आलोच्यताम्। 10

***अथवा,***

(a) मातृभाषायामनुवादः क्रियताम् ***(कस्यचनैकस्य)***। 5

(i) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः।

(ii) न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलमनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्म्यमनुरुध्यते। न त्यागमाद्रियते।

(b) भावसम्प्रसारणं क्रियताम्। 5

कुसुमशरप्रहारजर्जरिते हृदये जलमिव गलत्युपदिष्टम्।

***अथवा,***

सततममूलमन्त्रगम्यो विषमो विषास्वादमोहः।

**Unit : II**

**(Marks : 10)**

2. कथाकाव्यस्य अलंकारशास्त्रसम्मतानि वैशिष्ट्यानि लिखित्वा कादम्बर्यां तानि सर्वथानुसृतानि न वेति विचार्यताम्। 5+5

***अथवा,***

"बाणोच्छिष्टं जगत् सर्वम्"– इत्युक्तेः याथार्थ्यं कादम्बरीग्रन्थं विशेषतः पाठ्यांशमनुसृत्य विचार्यताम्। 10

## Section - B

### Unit : I
### (Marks : 15)

3. (a) अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं ***संस्कृतभाषया देवनागरलिप्या*** च लेखनीयम्। 2×5

(i) कस्मिन् मूलग्रन्थे राजवाहनचरितमिति पाठ्यांशस्य अन्तर्भावः? तस्य ग्रन्थस्य रचयितुर्नाम किम्?

(ii) पूर्वजन्मनि राजवाहनस्य अवन्तिसुन्दर्याश्च नाम किमासीत्?

(iii) "अद्यैव क्षपावसाने विवाहनीया राजदुहिता"– अत्र राजदुहिता-शब्देन का बोधिता? कैश्च विवाहक्षणः निर्धारितः?

(iv) "ददृशुश्च तदवस्थं राजकुमारम्"– अत्र राजकुमारशब्देन कः बोधितः? तस्य कीदृशी अवस्था सूचिता?

(v) "सहस्व वासु मासद्वयम्"– केनोक्तमिदम् आश्वासवाक्यम्? वासु-शब्दस्य कोऽर्थः?

(vi) का आसीद् बालचन्द्रिका? तस्याः पत्युः नाम किम्?

(vii) मालवराजस्य पुत्रस्य नाम किम्? स कुत्र तपस्यायां निरत आसीत्?

(b) अधोरेखाङ्कितयोः पदयोः कस्यचित् ***एकस्य संस्कृतभाषया देवनागरलिप्या*** च विग्रहवाक्यं प्रदाय समासनाम लेखनीयम्। 2×1

(i) रुरोध च बलभरदत्तकम्पः चम्पाम्।

(ii) सुप्तयोस्तु तयोः स्वप्ने विसगुणनिगड़ितचरणः जरठः कश्चिज्जालपादोऽदृश्यत।

(c) अधोरेखाङ्कितयोः यथाभिमत***मेकस्य संस्कृतभाषया देवनागरलिप्या*** च व्याकरणसम्मता टिप्पणी लेखनीया। 2×1

(i) राजपुत्रं सरभसम् आचकर्ष।

(ii) पक्वम् इदानीं त्वत्पादपद्मपरिचर्याफलम्।

(d) अधोरेखाङ्कितयोः यथाभिमत***मेकस्य*** व्युत्पत्तिः प्रदर्शनीया। 1×1

(i) मुक्तकण्ठम् आचक्रन्द राजकन्या।

(ii) प्रत्यबुध्येतां चोभौ।

### Unit : II
### (Marks : 15)

4. का सुरतमञ्जरी? तस्याः रजतशृङ्खलायां परिणमनं वर्णयित्वा कथं सा पूर्वरूपं लब्धवतीति संस्कृतभाषया देवनागरलिप्या च यथापाठ्यं वर्ण्यताम्। 1+4+5

***अथवा,***

(a) कस्यचि***देकस्य*** भावः सम्प्रसार्यताम्। 6×1

(i) क्षणे च तस्मिन् मुमुचे तदङ्घ्रियुगलं रजतशृङ्खलया।

(ii) कः स महापुरुषो येनैतन्मानुषमात्रदुष्करं महत् कर्मानुष्ठितम्।

(b) कस्यचि***देकस्य*** विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्। 2×1

(i) तदङ्घ्रियुगलम् 4(a)(i) प्रश्ने।

(ii) महापुरुषः 4(a)(ii) प्रश्ने।

(c) कस्यचि***देकस्य*** कारकविभक्तिः निर्णेया। 1×1

(i) रजतशृङ्खलया 4(a)(i) प्रश्ने।

(ii) येन 4(a)(ii) प्रश्ने।

(d) कस्यचि***देकस्य*** व्युत्पत्तिः कार्या। 1×1

(i) मुमुचे 4(a)(i) प्रश्ने।

(ii) अनुष्ठितम् 4(a)(ii) प्रश्ने।

**5.** कस्यचि***देकस्य*** मातृभाषया अनुवादः कार्यः। 5×1

(a) स्थविरः स राजा जराविलुप्तमानावमानचित्तो दुश्चरितदुहितृपक्षपाती यदेव किञ्चित् प्रलपति, त्वयापि किं तदनुमत्या स्थातव्यम्।

(b) हृष्टस्तु व्याजहार चापहारवर्मा – देव! दृष्टिदानेनानुगृह्यतामयमाज्ञाकरः। सोऽयमहमेवामुना रूपेण धनमित्राख्यया चान्तरितो मन्तव्यः।

## Section - C

### Unit : II
### (Marks : 15)

**6.** (a) अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं ***संस्कृतभाषया देवनागरलिप्या*** च देयम्। 2×5

(i) पञ्चतन्त्रस्य रचयिता कः? किमर्थं ग्रन्थोऽयं तेन रचितः?

(ii) पञ्चतन्त्रे कति तन्त्राणि सन्ति? तेषां नामानि अनुक्रमेण लिख्यन्ताम्।

(iii) शुकसप्तति-ग्रन्थस्य रचयिता कः? तत्र कति आख्यानानि सन्ति?

(iv) वेतालपञ्चविंशतिकाग्रन्थे क आसीत् वेतालः? ग्रन्थस्यास्य रचयिता कः?

(v) सिंहासनद्वात्रिंशिका-ग्रन्थानुसारेण विक्रमादित्याय सिंहासनं केन प्रदत्तम्? ग्रन्थस्यास्यापरं नाम किम्?

(vi) वेतालपञ्चविंशतिका-ग्रन्थे कः कस्मै राज्ञे फलानि दत्तवान्?

(vii) शुकसप्ततिग्रन्थे आख्यानानां वक्ता कः? स कां तानि अश्रावयत्?

(b) कस्यचित् ***एकस्य संस्कृतभाषया देवनागरलिप्या*** च टीका लेखनीया। 5×1

(i) हितोपदेशः।

(ii) पुरुषपरीक्षा।

---